श्रीगणेशायनमः श्रीवेदव्यासायनमः अथशारीरसूत्रेलिख्यते ॐअथातोब्रह्मजिज्ञासा॥१
जन्माद्यस्ययतः २।१२ शास्त्रयोनित्वात् ३।३ तत्तुसमन्वयात् ४।४ ईक्षतेर्नाशब्दं ५ गौणश्चे
न्नात्मशब्दात् ६ तन्निष्ठस्यमोक्षोपदेशात् ७ हेयत्वावचनाच्च ८ स्वाप्ययात् ९ गतिसामान्या
त् १० श्रुतत्वाच्च ११।५ आनंदमयोभ्यासात् १२ विकारशब्दान्नेतिचेन्नप्राचुर्यात् १३ तद्धेतु
व्यपदेशाच्च १४ मांत्रवर्णिकमेवचगीयते १५ नेतरोनुपपत्तेः १६ भेदव्यपदेशाच्च १७ कामा
च्चनानुमानापेक्षा १८ अस्मिन्नस्यचतद्योगंशास्ति १९।६ अंतस्तद्धर्मोपदेशात् २० भेदव्यपदे
शाच्चान्यः २१।७ आकाशस्तल्लिंगात् २२।८ अतएवप्राणः २३।९ ज्योतिश्चरणाभिधानात्
२४ छंदोभिधानान्नेतिचेन्नतथाचेतोर्पणनिगदात्तथाहिदर्शनं २५ भूतादिपादव्यपदेशोपपत्ते
श्चैवं २६ उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् २७।१० प्राणस्तथानुगमात् २८
नवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमाह्यस्मिन् २९ शास्त्रदृष्ट्यातूपदेशोवामदेववत्
३० जीवमुख्यप्राणलिंगान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगान् ३१।११ ॐइतिशा
रीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेप्रथमाध्यायेप्रथमःपादःसमाप्तः १ सूत्राणि ३१ अ

धिकरणानि ११ श्रीगुरुभ्योनमः ॐसर्वत्रप्रसिद्धोपदेशात् १ विवक्षितगुणोपपत्तेश्च २
अनुपपत्तेस्तुनशारीरः ३ कर्मकर्तृव्यपदेशाच्च ४ शब्दविशेषात् ५ स्मृतेश्च ६ अर्भकौकस्त्वा
त्तद्व्यपदेशाच्चनेतिचेन्निचाय्यत्वादेवंव्योमवच्च ७ संभोगप्राप्तिरितिचेन्नवैशेष्यात् ८।१२ अ
त्ताचराचरग्रहणात् ९ प्रकरणाच्च १०।१३ गुहांप्रविष्टावात्मानौहितद्दर्शनात् ११ विशेषणाच्च १२
।१३ अंतरउपपत्तेः १३ स्थानादिव्यपदेशाच्च १४ सुखविशिष्टाभिधानादेवच १५ श्रुतोपनिषत्क
गत्यभिधानाच्च १६ अनवस्थितेरसंभवाच्चनेतरः १७।१४ अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्
१८ नचस्मार्तमतद्धर्माभिलापात् १९ शारीरश्चोभयेपिहिभेदेनैनमधीयते २०।१५ अदृश्यत्वादि
गुणकोधर्मोक्तेः ८१ विशेषणभेदव्यपदेशाभ्यांचनेतरौ २२ रूपोपन्यासाच्च २३।१६ वैश्वा
नरःसाधारणशब्दविशेषात् २४ स्मर्यमाणमनुमानंस्यादिति २५ शब्दादिभ्योंतः प्रतिष्ठाना
न्नेतिचेन्नतथादृष्ट्युपदेशादसंभवात्पुरुषमपिचैनमधीयते २६ अतएवनदेवताभूतंच २७
साक्षादप्यविरोधंजैमिनिः २८ अभिव्यक्तेरित्याश्मरथ्यः २९ अनुस्मृतेर्बादरिः ३० संपत्तेरिति
जैमिनिस्तथाहिदर्शयति ३१ आमनंतिचैनमस्मिन् ३२।१७ ॐइतिशारीकमीमांसाभाष्यप्रणीतब्रह्म

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सूत्रेप्रथमाध्यायेद्वितीयःपादः २ सूत्राणि ३२ अधिकरणानि ७ ॐद्युभ्वाद्यायतनंस्वशब्दा
त् १ मुक्तोपसृप्यव्यपदेशात् २ नानुमानमतच्छब्दात् ३ प्राणभृच्च ४ भेदव्यपदेशात् ५ त्रैक
रणात् ६ स्थित्यदनाभ्यांच ७ ११ भूमासंप्रसादादध्युपदेशात् ८ धर्मोपपत्तेश्च ९ १२ अक्षर
मंबरांतधृतेः १० सावप्रशासनात् ११ अन्यभावव्यावृत्तेश्च १२ १३ ईक्षतिकर्मव्यपदेशात्सः १३
१४ दहरउत्तरेभ्यः १४ गतिशब्दाभ्यांतथाहिदृष्टंलिंगंच १५ धृतेश्चमहिम्नोस्यास्मिन्नुपलब्धेः
१६ प्रसिद्धेश्च १७ इतरपरामर्शात्सइतिचेन्नासंभवात् १८ उत्तराच्चेदाविर्भूतस्वरूपस्तु १९
अन्यार्थश्चपरामर्शः २० अल्पश्रुतेरितिचेन्नतदुक्तं २१ १५ अनुकृतेस्तस्यच २२ अपिचस्मर्यते
२३ १६ शब्दादेवप्रमितः २४ तदुपर्यपिबादरायणः
संभवात् २५ १७ तदुपर्यपिबादरायणः
संभवात् २६ विरोधःकर्मणीतिचेन्नानेकप्रतिपत्तेर्दर्शनात् २७ शब्द इतिचेन्नातःप्रभवात्प्र
त्यक्षानुमानाभ्यां २८ अतएवचनित्यत्वं २९ समाननामरूपत्वाच्चावृत्तावप्यविरोधोदर्शना
त्स्मृतेश्च ३० मध्वादिष्वसंभवादनधिकारंजैमिनिः ३१ ज्योतिर्विभावाच्च ३२ भावंतुबादरा
यणोस्तिहि ३३ १८ शुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहि ३४ क्षत्रियत्वगतेश्चोत्तर

त्रचैत्ररथेनलिंगात् ३५ संस्कारपरामर्शात्तदभावाभिलापाच्च ३६ तदभावनिर्धारणेच
प्रवृत्तेः ३७ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ३८ १९ कंपनात् ३९ २० ज्योतिर्दर्शनात् ४०
२१ आकाशोर्थांतरत्वादिव्यपदेशात् ४१ २२ सुषुप्त्युत्क्रांत्योर्भेदेन ४२ पत्यादिशब्देभ्यः ४३
२३ ॐइतिशारीरकमीमांसव्यासप्रणीतेब्रह्मसूत्रेप्रथमाध्यायेतृतीयःपादःसमाप्तः ॥ ३ ॥
सूत्राणि ४३ अधिकरणानि १३ श्रीगुरुभ्योनमः आनुमानिकमप्येकेषामितिचेन्नशरीर
रूपकविन्यस्तगृहीतेर्दर्शयतिच १ सूक्ष्मंतुतदर्हत्वात् २ तदधीनत्वादर्थवत् ३ ज्ञेयत्ववचना
च्च ४ वदतीतिचेन्नप्राज्ञोहिप्रकरणात् ५ त्रयाणामेवचैवमुपन्यासःप्रश्नश्च ६ महद्वच्च ७ १
चमसवदविशेषात् ८ ज्योतिरुपक्रमात्तुतथात्वध्यधीयतएके ९ कल्पनोपदेशाच्चमध्वादिव
दविरोधः १० २ नसंख्योपसंग्रहादपिनानाभावादतिरेकाच्च ११ प्राणादयोवाक्यशेषात् १२
ज्योतिषैकेषामसत्यन्ने १३ १३ कारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेः १४ समाकर्षा
त् १५ १४ जगद्वाचित्वात् १६ जीवमुख्यप्राणलिंगान्नेतिचेन्नोपासात्रैविध्यात् १७ अन्यार्थंतुजै
मिनिः प्रश्नव्याख्यानाभ्यामपिचैवमेके १८ १५ वाक्यान्वयात् १९ प्रतिज्ञासिद्धेर्लिंगमाश्म

रथ्यः २० उत्क्रमिष्यत एवंभावादित्यौडुलोमिः २१ अवस्थितेरितिकाशकृत्स्नः २२।१६ प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात् २३ अभिध्योपदेशाच्च २४ साक्षाच्चोभयाम्नानात् २५ आत्मकृतेः परिणामात् २६ योनिश्चहि गीयते २७।१७ एतेनसर्वेव्याख्याताव्याख्याताः २८।१८ ॐ इति शारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेप्रथमाध्यायेचतुर्थः पादः समाप्तः ४ सूत्राणि २८ अधिकरणानि ८ समाप्तोयंब्रह्मसूत्रस्यप्रथमाध्यायः १ एवंप्रथमाध्यायस्यसूत्राणि॥१२८ अधिकरणानि ३९॥ ॥श्रीनारायणोजयति ॐ स्मृत्यनवकाशदोषप्रसंगइतिचेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् १ इतरेषांचानुपलब्धेः २।१ एतेनयोगः प्रत्युक्तः॥ ३।२ नविलक्षणत्वादस्यतथात्वंचशब्दात् ४ अभिमानव्यपदेशस्तुविशेषानुगतिभ्यां ५ दृश्यते तु ६ असदितिचेन्नप्रतिषेधमात्रत्वात् ७ अपीतौतद्वत्प्रसंगादसमंजसं ८ ननुदृष्टांतभावात् ९ स्वपक्षदोषाच्च १० तर्काप्रतिष्ठानादप्यन्यथानुमेयमितिचेदेवमप्यविमोक्षप्रसंगः ११। ३ एतेनशिष्टापरिग्रहाअपिव्याख्याताः १२।४ भोक्त्रापत्तेरविभागश्चेत्स्यालोककवत् १३ १५ तदनन्यत्वमारंभणशब्दादिभ्यः १४ भावेचोपलब्धेः १५ सत्वाच्चावरस्य १६ असद्व्यपदेशान्नेतिचेन्नधर्मांतरेणवाक्यशेषात् १७ युक्तेःशब्दांतराच्च १८ पटवच्च १९ यथाचप्राणादिः २०।५ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः २१ अधिकंतुभेदनिर्देशात् २२ अश्मादिवच्चतदनुपपत्तिः २३।७ उपसंहारदर्शनान्नेतिचेन्नक्षीरवद्धि २४ देवादिवल्लोके २५।८ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवा २६ श्रुतेस्तुशब्दमूलत्वात् २७ आत्मनिचैवंविचित्राश्चहि २८ स्वपक्षदोषाच्च २९।९ सर्वोपेताचतद्दर्शनात् ३० विकरणत्वान्नेतिचेन्नउक्तं ३१।१० नप्रयोजनवत्वात् ३२ लोकवत्तुलीलाकैवल्यं ३३।११ वैषम्यनैर्घृण्यन सापेक्षत्वान्नथाहिदर्शयति ३४ नकर्माविभागादितिचेन्नानादित्वात् ३५ उपपद्यतेचाप्युपलभ्यतेच ३६।१२ सर्वधर्मोपपत्तेश्च ३७।१३ शारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेद्वितीयाध्यायेप्रथमः पादः समाप्तः सूत्राणि ३७ अधिकरणानि १३॥ ॥श्रीमद्गुरुभ्योनमः॥ ॥ रचनानुपपत्तेश्चनानुमानं १ प्रवृत्तेश्च २ पयोंबुवच्चेत्तत्रापि ३ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ४ अन्यत्राभावाच्चतृणादिवत् ५ अभ्युपगमेप्यर्थाभावात् ६ पुरुषाश्मवदितिचेत्तथापि ७ अंगित्वानुपपत्तेश्च ८ अन्यथानुमितौचज्ञशक्तिवियोगात् ९ विप्रतिषेधा

त्वासमंजसं १० ।१ महद्दीर्घवद्वाह्रस्वपरिमंडलाभ्यां ११ ।२ उभयथापिनकर्मातस्तदभावः १२ समवायाभ्युपगमाच्चसाम्यादनवस्थितेः १३ नित्यमेवचभावात् १४ रूपादिमत्वाच्चविपर्ययोदर्शनात् १५ उभयथाचदोषात् १६ अपरिग्रहाच्चात्यंतमनपेक्षा १७ ।३ समुदायउभयहेतुकेपितदप्राप्तिः १८ इतरेतरप्रत्ययत्वादितिचेन्नोत्पत्तिमात्रनिमित्तत्वात् १९ उत्तरोत्पादेचपूर्वनिरोधात् २० असतिप्रतिज्ञोपरोधोयौगपद्यमन्यथा २१ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् २२ उभयथाचदोषात् २३ आकाशेचाविशेषात् २४ अनुस्मृतेश्च २५ नासतोऽदृष्टत्वात् २६ उदासीनानामपिचैवंसिद्धिः २७ ।४ नाभावउपलब्धेः २८ वैधर्म्याच्चस्वप्नादिवत् २९ नाभावोऽनुपलब्धेः ३० क्षणिकत्वाच्च ३१ सर्वथानुपपत्तेश्च ३२ ।५ नैकस्मिन्नसंभवात् ३३ एवंचात्माकार्त्स्न्यं ३४ नचपर्यायादप्यविरोधोविकारादिभ्यः ३५ अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः ३६ ।६ पत्युरसामंजस्यात् ३७ संबंधानुपपत्तेश्च ३८ अधिष्ठानानुपपत्तेश्च ३९ करणवच्चेन्नभोगादिभ्यः ४० अंतवत्त्वमसर्वज्ञतावा ४१ उत्पत्त्यसंभवात् ४२ नचकर्तुःकरणं ४३ विज्ञानादिभावेवातदप्रतिषेधः ४४ विप्रतिषेधाच्च ४५ ॐ इति

शारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेद्वितीयाध्यायेद्वितीयःपादःसमाप्तः सूत्राणि ४५ अधिकरणानि ८ श्रीगुरुभ्योनमः ॐ नवियदश्रुतेः १ अस्तितु २ गौण्यसंभवात् ३ शब्दाच्च ४ स्याच्चैकस्यापिब्रह्मशब्दवत् ५ प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ६ यावद्विकारंतुविभागोलोकवत् ७ ।१ एतेनमातरिश्वाव्याख्यातः ८ ।२ असंभवस्तुसतोऽनुपपत्तेः ९ ।३ तेजोऽतस्तथात्याह १० ।४ आपः ११ ।५ पृथिव्यधिकाररूपशब्दांतरेभ्यः १२ ।६ तदभिध्यानादेवतुतल्लिंगात्सः १३ ।७ विपर्ययेणतुक्रमोतऽउपपद्यतेच १४ ।८ अंतराविज्ञानमनसीक्रमेणतल्लिंगादितिचेन्नाविशेषात् १५ ।९ चराचरव्यपाश्रयस्तुस्याद्व्यपदेशोभाक्तस्तद्भावभावित्वात् १६ ।१० नात्माश्रुतेर्नित्यत्वाच्चताभ्यः १७ ।११ ज्ञोत एव १८ ।१२ उत्क्रांतिगत्यागतीनां १९ स्वात्मनाचोत्तरयोः २० नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात् २१ स्वशब्दोन्मानाभ्यांच २२ अविरोधश्चंदनवत् २३ अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदि हि २४ गुणाद्वालोकवत् २५ व्यतिरेकोगंधवत् २६ तथाचदर्शयति २७ पृथगुपदेशात् २८ तद्गुणसारत्वात्तुतद्व्यपदेशः प्रा

त्ववत् २९ यावदात्मनिभावित्वाच्चदोषस्तद्दर्शनात् ३० पुंस्त्वादिवत्त्वस्यसतोऽभिव्यक्तियोगात् ३१ नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमोवान्यथा ३२।१३ कर्तृशास्त्रार्थवत्वात् ३३ विहारोपदेशात् ३४ उपादानात् ३५ व्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्ययः ३६ उपलब्धिवदनियमः ३७ शक्तिविपर्ययात् ३८ समाध्यभावाच्च ३९।१४ यथाचतक्षोभयथा ४०।१५ परात्तुतच्छ्रुतेः ४१ कृतप्रयत्नापेक्षस्तुविहितप्रतिषिद्धावैयर्थ्यादिभ्यः ४२।१६ अंशोनानाव्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएके ४३ मंत्रवर्णाच्च ४४ अपिचस्मर्यते ४५ प्रकाशादिवन्नैवंपरः ४६ स्मरंतिच ४७ अनुज्ञापरिहारौदेहसंबंधाज्ज्योतिरादिवत् ४८ असंततेश्चाव्यतिकरः ४९ आभासएवच ५० अदृष्टानियमात् ५१ अभिसंध्यादिष्वपिचैवं ५२ प्रदेशादितिचेन्नांतर्भावात् ५३।१७ ॐ इतिशारीकमीमांसव्यासप्रणीतब्रह्मसूत्रेद्वितीयाध्यायेतृतीयाध्यायःसमाप्तः सूत्राणि १५३ अधिकरणानि १७

श्रीगुरुचरणाभ्यांनमः ॐ तथाप्राणाः १ गौण्यसंभवात् २ तत्पूर्वकत्वाद्वाचः ३।१ सप्तगतेर्विशेषितत्वाच्च ४ हस्तादयस्तुस्थितेतोनैवं ५।२ अणवश्च ६।३

श्रेष्ठश्च ७।४ नवायुक्रियेपृथगुपदेशात् ८ चक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यः ९ अकरणत्वाच्चदोषस्तथाहिदर्शयति १० पंचवृत्तिर्मनोवद्व्यपदिश्यते ११।५ अणुश्च १२।६ ज्योतिराद्यधिष्ठानंतुतदामननात् १३ प्राणवताशब्दात् १४ तस्यचनित्यत्वात् १५।७ तदिंद्रियाणितद्व्यपदेशादन्यत्रश्रेष्ठात् १६ भेदश्रुतेः १७ वैलक्षण्याच्च १८।८ संज्ञामूर्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशात् १९ मांसादिभौमंयथाशब्दमितरयोश्च २० वैशेष्यात्तुतद्वादस्तद्वादः २१।९ ॐ इतिशारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेद्वितीयाध्यायेचतुर्थः पादःसमाप्तः २ सूत्राणि २२ अधिकरणानि ९ एवंद्वितीयाध्यायस्यसूत्राणि १५७ अधिकरणानि ४७

श्रीगुरुभ्योनमः ॐ तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तः प्रश्ननिरूपणाभ्यां १ ज्यात्मकत्वात्तुभूयस्त्वात् २ प्राणगतेश्च ३ अग्न्यादिगतिश्रुतेरितिचेन्नभाक्त्वात् ४ प्रथमेश्रवणादितिचेन्नताएवह्युपपत्तेः ५ अश्रुतत्वादितिचेन्नेष्टादिकारिणांप्रतीतेः ६ भाक्तंवानात्मवित्वात्तथाहिदर्शयति७।१ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यांयथेतमनेवंच ८ चरणादितिचेन्नोपलक्षणार्थेतिकार्ष्णाजिनिः ९ आनर्थक्यमितिचेन्नतदपेक्षत्वात् १० सुकृतदुष्कृतेए

वेतितुबादरिः ११ १२ अनिष्टादिकारिणामपिचश्रुतं १२ संयमनेत्वनुभूयेतरेषामारोहावरोहौतद्गतिदर्शनात् १३ स्मरंतिच १४ अपिचसप्त १५ अत्रापिचतद्योपपत्तेः १६ विद्याकर्मणोरितितुप्रकृतत्वात् १७ नतृतीयेतथोपलब्धेः १८ स्मर्यतेपिचलोके १९ दर्शनाच्च २० तृतीयशब्दावरोधः संशोकजस्य २१ १३ साभाव्यापत्तिरुपपत्तेः २२ १४ नातिचिरेणविशेषात् २३ १५ अन्याधिष्ठितेषुपूर्ववदभिलापात् २४ अशुद्धमितिचेन्नशब्दात् २५ रेतःसिग्योगोऽथ २६ योनेःशरीरं २७ १६ ॐ इतिशारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेतृतीयाध्यायेप्रथमःपादःसमाप्तः सूत्राणि २७ अधिकरणानि ६ श्रीगुरुभ्योनमः ॐ संध्येसृष्टिराहहि १ निर्मातारंचैकेपुत्रादयश्च २ मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ३ सूचकश्चहिश्रुतेराचक्षतेचतद्विदः ४ पराभिध्यानात्तुतिरोहितंततोह्यस्यबंधविपर्ययौ ५ देहयोगाद्वासोपि ६ ११ तदभावोनाडीषुतच्छ्रुतेरात्मनिच ७ अतःप्रबोधोऽस्मात् ८ १२ सएवतुकर्मानुस्मृतिशब्दविधिभ्यः ९ २ मुग्ध्यर्धसंपत्तिःपरिशेषात् १० १४ नस्थानतोपिपरस्योभयलिंगंसर्वत्रहि ११ नहिभेदाहितिचेन्नप्रत्यकमतद्वचनात् १२

अपिचैवमेके १३ अरूपवदेवहितत्प्रधानत्वात् १४ प्रकाशवच्चावैय्यर्थ्यात् १५ आहचतन्मात्रं १६ दर्शयतिचाथोअपिस्मर्यते १७ अतएवचोपमासूर्यकादिवत् १८ अंबुवदग्रहणात्तुनतथात्वं १९ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं २० दर्शनाच्च २१ १५ प्रकृतैतावत्त्वंहि प्रतिषेधतिततोब्रवीतिचभूयः २२ तदव्यक्तमाहहि २३ अपिसंराधनेप्रत्यक्षानुमानाभ्यां २४ प्रकाशादिवच्चावैशेष्यंप्रकाशश्चकर्मण्यभ्यासात् २५ अतोनैतेनतथाहिलिंगं २६ उभयथादोषात्त्वहिकुंडलवत् २७ प्रकाशाश्रयवद्वातेजस्त्वात् २८ पूर्ववद्वा २९ प्रतिषेधाच्च ३० १६ परमतःसेतून्मानसंबंधभेदव्यपदेशेभ्यः ३१ सामान्यात्तु ३२ बुद्ध्यर्थःपादवत् ३३ स्थानविशेषात्प्रकाशादिवत् ३४ उपपत्तेश्च ३५ तथान्यप्रतिषेधात् ३६ अनेनसर्वगतत्वमायामशब्दादिभ्यः ३७ १७ फलमतउपपत्तेः ३८ श्रुतत्वाच्च ३९ धर्मंजैमिनिरतएव ४० पूर्वंतुबादरायणोहेतुव्यपदेशात् ४१ १८ ॐ इतिशारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेतृतीयाध्यायेद्वितीयःपादःसमाप्तः सूत्राणि ४१ अधिकरणानि ८ श्रीगुरुभ्योनमः ॐ सर्ववेदांतप्रत्ययंचोदनाद्यविशेषात् १ भेदान्नेतिचेन्न

कस्यामपि २ स्वाध्यायस्यतथात्वेनहिसमाचारेऽधिकाराच्चसववच्चतन्नियमः ३ दर्शयतिच ४।१उपसंहारोऽर्थाभेदाद्विधिशेषवत्समानेच ५।२अन्यथात्वंशब्दादितिचेन्नाविशेषात् ६ नवाप्रकरणभेदात्परोवरीयस्त्वादिवत् ७ संज्ञातश्चेतदुक्तमस्तितुतदपि ८ ३ व्याप्तेश्चसमंजसं ९।४ सर्वाभेदादन्यत्रेमे १०।५ आनंदादयःप्रधानस्य ११ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौहिभेदे १२ इतरेत्वर्थसामान्यात् १३।६ आध्यानायप्रयोजनाभावात् १४ आत्मशब्दाच्च १५।७ आत्मग्रहीतिरितरवदुत्तरात् १६ अन्वयादितिचेत्स्यादवधारणात् १७।८ कार्यात्ययेऽध्यनादृत्यपूर्वं १८।९ समानएवंचाभेदात् १९।१० संबंधादेवमन्यत्रापि २० नवाविशेषात् २१ दर्शयतिच २२।११ संभृतिद्युव्याप्त्यपिचातः २३।१२ पुरुषविद्यायामिवचेतरेषामनाम्नानात् २४।१३ वेधाद्यर्थभेदात् २५।१४ हानौतूपायनशब्दशेषत्वात्कुशाछंदस्तुत्युपगानवत्तदुक्तं २६।१५ सांपरायेतर्तव्याभावात्तथान्ये २७ छंदतऽभयाविरोधात् २८।१६ गतेरर्थवत्त्वमुभयथान्यथाहिविरोधः २९ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ३०।१७ अनियमःसर्वासामविरोधःशब्दानुमानाभ्यां ३१।१८

यावदधिकारमवस्थितिराधिकारिकाणां ३२।१९ अक्षरधियांत्ववरोधःसामान्यतद्भावाभ्यामौपसदवत्तदुक्तं ३३।२० इयदामननात् ३४।२१ अंतराभूतग्रामवत्स्वात्मनः ३५ अन्यथाभेदानुपपत्तिरितिचेन्नोपदेशांतरवत् ३६।२२ व्यतिहारोविशिषंतिहीतरवत् ३७।२३ सैवहिसत्यादयः ३८।२४ कामादीतरत्रतत्रचायतनादिभ्यः ३९।२५ आदरादलोपः ४० उपस्थितेतत्स्वचनात् ४१।२६ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ह्यप्रतिबंधःफलं ४२।२७ प्रदानवदेवतदुक्तं ४३।२८ लिंगभूयस्त्वात्तद्धिबलीयस्तदपि ४४ पूर्वविकल्पःप्रकरणात्स्याक्रियामानसवत् ४५ अतिदेशाच्च ४६ विद्यैवतुनिर्धारणात् ४७ दर्शनाच्च ४८ श्रुत्यादिबलीयस्त्वाच्चनबाधः ४९ अनुबंधादिभ्यःप्रज्ञांतरपृथक्त्ववद्दृष्टश्चतदुक्तं ५० नसामान्यादप्युपलब्धेर्मृत्युवन्नहिलोकापत्तिः ५१ परेणचशब्दस्यतादर्थ्यंभूयस्त्वात्त्वनुबंधः ५२।२९ एकआत्मनःशरीरभावात् ५३ व्यतिरेकस्तद्भावाभावित्वान्नत्वपलब्धिवत् ५४।३० अंगावबद्धास्तुशास्त्रासाहिप्रतिवेदं ५५ मंत्रादिवद्वाऽविरोधः ५६।३१ भूम्नःक्रतुवज्ज्यायस्त्वंतथाहिदर्शयति ५७।३२ नानाशब्दादिभेदात् ५८।३३ विकल्पोविशिष्टफलत्वात् ५९।३४

काम्यास्कृयथाकामंसमुच्चीयेरन्नवा पूर्वहेत्वभावात् ६०।३५ अंगेषुयथाश्रयभावः॥ ६१ शिष्टेश्च ६२ समाहारात् ६३ गुणसाधारण्यश्रुतेश्च ६४ नवातत्सहभावाश्रुतेः ६५ दर्शनाच्च ६६।६६ ॐ इतिशारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेतृतीयाध्यायेतृतीयःपादःसमाप्तः ३ सूत्राणि ६६ अधिकरणानि ३६ ॥ ॥श्रीगुरुभ्योनमः ॐपुरुषार्थोतःशब्दादितिबादरायणः १ शेषत्वात्पुरुषार्थवादोयथान्येषितिजैमिनिः २ आचारदर्शनात्३ तच्छुतेः ४ समन्वारंभणात् ५ तद्वतोविधानात् ६ नियमाच्च ७ अधिकोपदेशात्तुबादरायणस्यैवंतद्दर्शनात् ८ अध्ययनमात्रवतुल्यंतद्दर्शनंच ९ असार्वत्रिकी १० विभागःशतवत् ११ अध्ययनमात्रवतः १२ नाविशेषात् १३ स्तुतयेनुमतिर्वा १४ कामकारेणचैके १५ उपमर्द्दंच १६ ऊर्ध्वरेतःसुचशब्देहि १७।१ परामर्शंजैमिनिरचोदनाचापवदतिहि १८ अनुष्ठेयंबादरायणःसाम्यश्रुतेः १९ विधिर्वाधारणवत् २०।२ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् २१ भावशब्दाच्च २२।३ पारिप्लवार्थइतिचेन्नविशेषितत्वात् २३ तथाचैकवाक्यतोपबंधात् २४।४ अतएवचाग्नींधनाद्यनपेक्षा २५।५ सर्वापेक्षाचयज्ञादिश्रुतेरश्ववत् २६ शमदमाद्युपेतःस्यात्तथापितुतद्विधेस्तदंगतयातेषामवश्यानुष्ठेयत्वात्२७।६ सर्वान्नानुमतिश्चप्राणात्ययेदर्शनात् २८ अबाधाच्च २९ अपिचस्मर्यते ३० शब्दश्चातोकामकारे ३१।७ विहितत्वाच्चाश्रमकर्मापि ३२ सहकारित्वेनच ३३ सर्वथापितएवोभयलिंगात् ३४ अनभिभवंचदर्शयति ३५।८ अंतराचापितुतद्दृष्टेः ३६ अपिचस्मर्यते ३७ विशेषानुग्रहश्च ३८ अतस्त्वितरज्यायोलिंगाच्च ३९।९ तद्भूतस्यतुनातद्भावोजैमिनेरपिनियमातद्रूपाभावेभ्यः ४०।१० नचाधिकारिकमपिपतनानुमानात्तदयोगात् ४१ उपपूर्वमपीत्येकेभावमशनवत्तदुक्तं ४२।११ बहिस्तूभयथापिस्मृतेराचाराच्च ४३।१२ स्वामिनःफलश्रुतेरित्यात्रेयः ४४ आर्त्विज्यमित्यौडुलोमिस्तस्मैहियज्ञः ४५ श्रुतेश्च ४६।१३ सहकार्यंतरविधिःपक्षेणतृतीयंतद्वतोविध्यादिवत् ४७ कृत्स्नभावात्तुगृहिणोपसंहारः ४८ मौनवदितरेषामप्युपदेशात् ४९।१४ अनाविष्कुर्वन्नन्वयात् ५०।१५ ऐहिकमप्यप्रस्तुतप्रतिबंधेतद्दर्शनात् ५१।१६ एवंमुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ५२।१७ ॐइतिशारीकमीमांसव्यासप्रणीतब्रह्मसूत्रेतृतीयाध्यायेचतुर्थः

पादःसमाप्तः ४ सूत्राणि ५२ अधिकरणानि १७ समाप्तोयंतृतीयाध्यायः ३ एवंसूत्राणि १८६ अधिकरणानि ६७ ॐश्रीमद्गुरुभ्योनमः आवृत्तिरसकृदुपदेशात् १ लिंगाच्च २।१ आत्मेतितूपगच्छंतिग्राहयंतिच ३।२ नप्रतीकेनहिसः ४।३ ब्रह्मदृष्टिरुत्कर्षात् ५।४ आदित्यादिमतयश्चांगउपपत्तेः ६।५ आसीनःसंभवात् ७ ध्यानाच्च ८।६ अचलत्वंचापेक्ष्य ९ स्मरंतिच १० यत्रैकाग्रतातत्राविशेषात् ११।७ आप्रायणात्तत्रापिहिदृष्टं॥ १२।८ तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशात् १३।९ इतरस्याप्येवमसंश्लेषःपातेतु १४।१० अनारब्धकार्येएवतुपूर्वेतदवधेः १५।११ अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनात् १६ अतोन्यापित्वेकेषामुभयोः १७।१२ यदेवविद्ययेतिहि १८।१३ भोगेनत्वितरक्षपयित्वासंपद्यते १९।१४ ॐ इतिशारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेचतुर्थाध्यायेप्रथमःपादःसमाप्तः १ सूत्राणि १९ अधिकरणानि १४॥ ॥श्रीमद्गुरुभ्योनमः ॐवाङ्मनसिदर्शनाच्छब्दाच्च १ अतएवचसर्वाण्यनु २।१ तन्मनःप्राणउत्तरात् ३।२ सोध्यक्षेतदुपगमादिभ्यः ४ भूतेषुतच्छ्रुतेः ५ नैकस्मिन्दर्शयतोहि ६।२ समानाचो

सृत्यपक्रमादमृतत्वंचानुपोष्य ७।४ तदापीतेःसंसारव्यपदेशात् ८ सूक्ष्मंप्रमाणतश्चतथोपलब्धेः ९ नोपमर्दनातः १० अस्यैवचोपपत्तेरूष्मा ११।५ प्रतिषेधादितिचेन्नशारीरात् १२ स्पष्टोह्येकेषां १३ स्मर्यतेच १४।६ तानिपरेतथात्याह १५।७ अविभागोवचनात् १६।८ तदोकोग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दानुगृहीतःशताधिकया १७।९ रश्म्यनुसारी १८ निशिनेतिचेन्नसंबंधस्ययावद्देहभावित्वाद्दर्शयतिच १९।१० अतश्चायनेपिदक्षिणे २० योगिनःप्रतिचस्मर्यतेस्मार्तैचैते २१।११ ॐ इतिशारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेचतुर्थाध्यायेद्वितीयःपादःसमाप्तः २ सूत्राणि २१ अधिकरणानि ११॥ ॥श्रीगुरुभ्योनमः ॐअर्चिरादिनातत्प्रथितेः १।१ वायुमब्दादविशेषविशेषाभ्यां २।२ तडितोधिवरुणःसंबंधात् ३।३ आतिवाहिकास्तल्लिंगात् ४ उभयव्यामोहात्तत्सिद्धेः ५ वैद्युतेनैवततस्तच्छ्रुतेः ६।४ कार्यंबादरिरस्यगत्युपपत्तेः ७ विशेषितत्वाच्च ८ सामीप्यात्तुतद्व्यपदेशः ९

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

कार्यात्ययेतदध्यक्षेणसहातः परमभिधानात् १० स्मृतेश्च ११।५ परंजैमिनिर्मुख्यत्वात् १ दर्शनाच्च १३।५ नचकार्यप्रतिपत्त्यभिसंधिः १४।६ अप्रतीकालंबनान्नयतीतिबादरायणउभयथाःदोषात्तत्क्रतुश्च १५ विशेषंचदर्शयति १६।७ ॐ इतिशारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेचतुर्थाध्यायेतृतीयः पादःसमाप्तः ३ सूत्राणि १६ अधिकरणानि ७ श्रीमद्गुरुभ्योनमः ॐ संपद्याविर्भावःस्वेनशब्दात् १ मुक्तःप्रतिज्ञानात् २ आत्माप्रकरणात् ३।१ अविभागेनदृष्टत्वात् ४।२ ब्राह्मेणजैमिनिरुपन्यासादिभ्यः ५ चितितन्मात्रेणतदात्मकत्वादित्यौडुलोमिः ६ एवमप्युपन्यासात्पूर्वभावादविरोधंबादरायणः ७।३ संकल्पादेवतच्छ्रुतेः ८ अतएवचानन्याधिपतिः ९।४ अभावंबादरिराहह्येवं १० भावंजैमिनिर्विकल्पामननात् ११ द्वादशाहवदुभयविधंबादरायणोतः १२ तन्वभावेसंध्यवदुपपत्तेः १३ भावेजाग्रद्वत् १४।५ प्रदीपवदावेशस्तथाहिदर्शयति १५ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतंहि १६।६ जगद्व्यापारवर्ज्यंप्रकरणादसन्निहितत्वाच्च १७ प्रत्यक्षोपदेशादितिचेन्नाधिकारि

कमंडलस्थोक्तेः १८ विकारावर्तिचतथाहिस्थितिमाह १९ दर्शयतश्चैवंप्रत्यक्षानुमाने २० भोगमात्रसाम्यलिंगाच्च २१ अनावृत्तिःशब्दादनावृत्तिःशब्दात् २२।७ ॐ तत्सदिति शारीरकमीमांसव्यासप्रणीतब्रह्मसूत्रेचतुर्थाध्यायेचतुर्थः पादःसमाप्तः॥ ॥सूत्राणि २२ अधिकरणानि ७ चतुर्थाध्यायस्यसूत्राणि ७८ अधिकरणानि ३९ समग्रसूत्रसंख्या ५ ५५ अधिकरणसंख्या १९२ शके १७५१ विरोधीनामसंवत्सरेमार्गशीर्षमासे शुक्लपक्षषष्ठ्यांतिथौसौम्यवासरेसमाप्तमिदंव्याससूत्रं अशुभानिनिरासचेष्टतेनोतिशुभसंततिं॥ स्मृतिमात्रेणयत्पुंसांब्रह्मतन्मंगलंपरं॥ १ ॥अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात्॥ स्मर्तृणांवरदत्वाच्चब्रह्मतन्मंगलंविदुः॥ २ ॥ओंकारश्चाथशब्दश्च द्वावेतौब्रह्मणःपुरा॥ कंठंभित्वाविनिर्यातौतस्मान्मांगलिकावुभौ ३ ॥ ॥रामः॥ शुभंभवतु॥ ॥श्रीरामचंद्रप्रसन्न॥ ॥युधंधहनु॥ ॥रामः॥ ॥श्रीः॥ यदक्षरपदभ्रष्टंमात्राहीनंचयद्भवेत्॥तत्सर्वंक्षम्यतांदेवप्रसीदपरमेश्वर॥ १ ॥रामः